॥ श्रीः ॥

# सप्तान्नविद्योपासना

**नत्वा देवं गुरुन्नेकदेशो वाजसनेयके ।**

**सप्तान्नोपासनाख्योऽसौ लिख्यते सर्वशुद्धये ॥**

काण्वं, वाजसनेयकं इत्यादिनैकनामभिः विश्रुता बृहदारण्यकोपनिषत् सृष्ट्यादौ विरिञ्चिकृतस्तुतिरूपा । चतुर्मुखः यथा भगवन्तम् एतन्मन्त्रेण तुष्टाव, तथैव सूर्यं प्रत्युपदिष्टवान् । स चादित्यः तुरगरूपेण याज्ञवल्क्याय प्रोवाच । याज्ञवल्क्यस्तु कण्वं प्रत्युपदिदेश ।

वाजिरूपेणार्केण उपदिष्टत्वादस्य **"वाजसनेयकम्"** इति नाम, कण्वाय प्रोक्तत्वाच्चेदं **"काण्वम्"** इति प्रथामवाप । एतस्याश्चोपनिषदः प्रथमाध्यायस्य चरमभागे अव्याकृतब्राह्मणानन्तरं सप्तान्नब्राह्मणम् आरभ्यते ।

**"यत् सप्तान्नानि मेधया, तपसा अजनयत् पिता" इति ।**

उपनिषदः साक्षादर्थज्ञानाभाववताम् अस्माकं श्रीमन्मध्वाचार्याणां भाष्यमेव बोधकम्, भाष्यदिशा तस्यार्थस्तु यत् = यदा, पिता = विष्णुः, तपसा = प्राणिनां कर्मभिः, मेधया=स्वेच्छया, सप्तान्नानि = सप्तविधम् अन्नम् अजनयत् = सृष्टवान् इति । कानि तानि सप्तान्नानि –

**1) "एकमस्य साधारणम्"**

प्रथमम् अन्नं तु जगतः साधारणम् । सर्वैः यदद्यते तदेव हरिणा सृष्टं प्रथमम् अन्नमित्यर्थः। अस्यान्नस्य साधारणत्वात् इदं सर्वमन्नं ममैव इति यः जानाति सोऽक्षय्यं पापं प्राप्नोति । कुतः?

**"मिश्रं ह्येतत्"** इदमन्नं देवब्राह्मणादिसाधारणम्, अतोऽस्मिन्नन्ने ममता देवस्व–ब्रह्मस्व–अपहारतुल्या भवति ।

**२, ३) "द्वे देवानभाजयत्"** इति द्वितीयतृतीयेऽन्ने निरूप्येते । विष्णुः देवताभ्यः द्वेऽन्ने विभज्य दत्तवान् ।

**अनुवर्तते.. .. ..** ✍

ते च **"हुतं च प्रहुतं च"** इति वैश्वदेव–बलिहरणाख्ये, एते च देवतानाम् अन्ने इत्यत एव देवताः उद्दिश्य वैश्वदेव–बलिहरणे कुर्वन्ति ।

उपनिषत् अत्र दर्शपूर्णमासौ अपि देवतानाम् अन्ने इति वदति । अत एव कोऽपि फलेच्छया यज्ञं न कुर्यात् । यदि क्रियते तर्हि तेषामेवान्नं तान् उद्दिश्य स्वफलापेक्षया ददत् परस्वापहारदोषभाग्भवति ।

**४) "पशुभ्य एकं प्रायच्छत्, तत् पयः"** हरिणा सृष्टं चतुर्थम् अन्नं पय एव , शैशवावस्थायां सर्वे मनुष्याः पशवश्च पय एव उपजीवन्ति । एतेषां पयसः उपजीव्यत्वादेव जातमात्रं शिशुं प्रथमं क्षीरजन्यं घृतमेव प्रतिलेहयन्ति । तदनन्तरं स्तन्यं पयः पाययन्ति । तदानीं पशोरपि क्षीरमेव उपजीव्यं । अत एव लोके जातमात्रं वत्सम् 'अतृणादः' इति वदन्ति। जातः वत्सः प्रथमं तृणं नात्ति, किन्तु पय एव पिबतीति सर्वे वदन्ति, जानन्ति च ।

**"तस्मिन् सर्वं प्रतिष्ठितं"** चेतनाचेतनात्मकं जगत् क्षीरमेव उपजीवति । क्षीरमिदं न केवलं लौकिकफलहेतुः, किन्तु पारलौकिकफलकारणमपि भवति । **"संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयति"** यः संवत्सरपर्यन्तं क्षीरहोमं करोति सोऽपमृत्युं जयति । मुक्तो भवतीति यावत् । न केवलं एतावत् किन्तु हरेः सप्तान्नस्रष्टृत्वमाहात्म्यज्ञानि एकस्मिन्नेवाहनि पयोहोमं कृत्वा संसारं जयति, मुच्यते च । सर्वान्नेषु पयस एव प्राधान्यात् तद्दाता देवेभ्यः सर्वान्नदातेव भवति ।

**"कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा"** अनाद्यनन्तकालात् सर्वैः भक्षयमाणान्यपि एतानि अन्नानि कुतः न नष्टानि? इति चेत् 'भगवतः' एव ।

भगवान्नारायणः एतानि सर्वाण्यन्नानि अक्षय्याणि करोति । यदा यदा तानि भक्षितानि भवन्ति तदा तदा विष्णुरेव तानि पुनः पुनः स्वेच्छया प्राणिनां कर्मणा च जनयते ।

**५,६,७) "त्रीण्यात्मनेऽकुरुत"** परमात्मा विष्णुः उर्वरितानि मनः, वाक्, प्राणः इत्यन्नत्रयम् आत्मने = स्वार्थं सृष्टवान् । मनोवाक्प्राणाः स्वविषये प्रवृत्ताः अन्नवत् स्वस्यैव तुष्टिकराः भवेयुः इत्येतदर्थं तान् सृष्टवान् इत्यर्थः। अन्येषु इन्द्रियेषु सत्सु मनसः एव कुतः आत्मार्थं सृष्टिः इति चेत् प्राधान्यात् । तथा हि देवदत्तः यदा यज्ञदत्तं पृच्छति "तद्वस्तु दृष्टं वा, स शब्दः श्रुतो वा" इति तदा यज्ञदत्तः "अहं तदा अन्यत्रमना अभूवं, अतः तद्वस्तु न दृष्टवान्, शब्दमपि तं न श्रुतवान्" इति प्रतिवदति ।

अनुवर्तते.. .. ..

अतः सर्वे मनसैव पश्यन्ति, मनसैव श्रुण्वन्ति च । इत्थं मनसः प्राधान्यात् तदेवान्नं विष्णुः ससर्ज । परमात्मनः अन्नतया उक्तानि “कामः, सङ्कल्पः, विचिकित्सा श्रद्धाऽश्रद्धा, धृतिरधृतिः, ह्रीः, धीः, भीः” इत्यादीनि मनःपरिणामान्येव ।

वाचः भगवदन्नत्वं तु ध्वन्यात्मकाः वर्णात्मकाश्च सर्वे शब्दाः वागिन्द्रियेणैव उच्चार्यन्ते, अपि च ते सर्वेऽपि विष्णुनामानि, तत्प्रीतिकराश्च भवन्ति । अतः सकलशब्दोच्चारणद्वारा वागिन्द्रियं सर्वान्तस्थं विष्णुं विषयीकुर्वत् तस्यान्नं भवति ।

प्राणस्तु सर्वदा हरिविषयकः एव भवतीति तस्यापि भगवदन्नत्वं वर्तत एव । प्राणापानव्यानोदानसमानास्तु प्राणस्यैव प्रभेदाः ।

यः एतादृशीं सप्तान्नविद्यामुपास्ते तस्य फलं उपनिषत्  इत्थं वदति ।

**“ स देवानपि गच्छति, स ऊर्जमुपजीवति इति प्रशंसा”**

सप्तान्नोपासकः ज्ञानी देवपदयोग्यश्चेत् तत्पदं लभते, तदयोग्यः मनुष्यश्चेत् देवतानां समीपं गच्छति इति सप्तान्नविद्यायाः, तज्ज्ञानिनश्च प्रशंसा उपनिषदि निरूपिता ।

इतः परमपि उपनिषदि भाष्ये च अनेके विषयाः प्रतिपादिताः तथापि लेखनाल्पत्वाय अत्रैव विरम्यते ॥

**॥ श्रीकृष्णार्पणमस्तु ॥**

*** * * * ***